# सम्प्रदानत्वविमर्शः

## जगन्नाथशर्मा (विद्यावारिधिः)

*सहप्राध्यापकः, ने.सं.वि., महेशसंस्कृतगुरुकुलविद्यापीठम्*

### शोधसारः

*अत्र लेखे "कर्मणा यमभिप्रैति स सम्प्रदानम्" इति सूत्रस्य कौमुद्यनुसारेणार्थविवरणं शेखराद्यनुसारेण पदकृत्यञ्च विधीयते। । "क्रियाग्रहणं कर्तव्यमिति" वक्तुः वार्तिककारस्य कः आशयः, किं तस्य वार्तिकस्य प्रयोजनम्, कश्चात्र भाष्याभिप्राय इत्येवं समृज्जृम्भतां प्रश्नानामत्र समाधानं क्रियते। कारकचतुर्थ्याः क अर्थः, का च सम्प्रदानत्वशक्तिर्नाम इत्येते विचारा अत्र प्रस्तूयन्ते। एवमेवात्र क्रियाकारकभावसम्बन्धः विभक्त्यर्थ एव, न त्वाकाङ्क्षालभ्य इति नव्यवैयाकरणमतं प्रतिपाद्यते। किञ्च सः सम्बन्धः संसर्गतया भासते, उत प्रकारत्वेनेत्येतेऽपि विचारा सुस्पष्टमत्र विवृताः सन्ति। एवं प्रकारेणात्र लेखे सम्प्रदानसूत्रस्य विविच्य ज्ञानार्थं ये येंऽशा अपेक्ष्यन्ते ते सर्वेऽपि समुपस्थापिता वर्तन्ते।*

### शब्दबीजानि

कारकम्, विभक्तिः, व्यापारः, सम्प्रदानम्, सम्बन्धः।

### विषयपरिचयः

विदितचरमेव हि विदुषामस्माकं परमप्रमाणभूतस्यापवर्गफलकस्य वेदस्यार्थावबोधाय तत्स्वराद्यवगमायास्ति महती आवश्यकता व्याकरणस्येति। तथा हि 'तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते' इति शिक्षावचनानुसारं वेदाङ्गज्ञानं विना न निश्रेयससिद्धिरिति 'प्रधानञ्च षट्स्वङ्गेषु व्याकरणमि'ति पस्पशास्थभाष्यवचनानुसारं प्रधानस्य व्याकरणस्याध्ययनं जनान्परमार्थभूतं मोक्षपदवीमारोहयति। शास्त्रेऽस्मिन् पाणिनीयसूत्राणां सूक्ष्मेक्षिकया उक्तानुक्तदुरुक्तचिन्तापूर्वकं विवरणमादौ वररुचिनाकारि। भूषयामास च तदनु महाभाष्येण शास्त्रमिमं महाभाष्यकारः। तदनु भर्तृहरिकैयटदीक्षितप्रभृतिभिः पूर्वाचार्यकृतसरणीमुररीकृत्य बहून् ग्रन्थान् समूचिरे। तेषु चेदानीं प्रक्रियाभागे कौमुदी शेखरमनोरमादिव्याख्यानालङ्कृता कौमुदीवाज्ञानतमः निवारयन्ती वरीवर्ति, आर्थिकभागे च वर्वर्ति भूषणसारमञ्जूषयोः स्थानं परमोत्कृष्टम्। तेषु च ग्रन्थेषु सुबर्थविचारे कारकप्रकरणे च सम्प्रदानसूत्रमधिकृत्य परमतकटाक्षपूर्वकं बहवः सिद्धान्ताः प्रतिपादिताः। अतोऽत्र लेखे तानेव ग्रन्थान्परिशील्य "कर्मणा यमभिप्रैति स सम्प्रदानम्" (पाणिनीयसूत्रम् १/४/३२) इति सूत्रव्याख्यानपुरस्सरं सम्प्रदानत्वविमर्शः प्रस्तूयते। भगवता पाणिनिना विरचितेऽष्टकेप्रथमाध्याये चतुर्थपादे द्वात्रिंशत्तमं सूत्रमिदं " कर्मणा यमभिप्रैति स सम्प्रदानम्" इति। सूत्रेणानेन सम्प्रदानसंज्ञा विधीयते। कर्मणा

करणभूतेन यमभिसम्बद्धुमिच्छति, तत्कारकं सम्प्रदानसंज्ञं स्यादिति सूत्रार्थः। तथा च- 'विप्राय गां ददाति देवदत्तः' इत्यादयः प्रयोगाः उदाहरणानि। दाधातूपस्थाप्यक्रियायां कर्म गौः, तया गवा विप्रमभिप्रैति देवदत्तः। तत्र देवदत्तकर्तृकायामभिप्रैतिक्रियायां गौः करणं, विप्रः कर्म। तत्र विप्रस्यानेन सम्प्रदानसंज्ञायां "चतुर्थी सम्प्रदाने"(पाणिनिसूत्रम्.२.३.१३) इति चतुर्थीविभक्तिः। एवञ्च-प्रकृतधातूपस्थाप्यक्रियानिरूपितं यत्कर्म तत्करणिका या प्रकृतधातूपस्थाप्यक्रियानिरूपितकर्तृकर्तृका अभिप्रैतिक्रिया तन्निरूपितकर्मणः प्रकृतधातूपस्थाप्यक्रियायां सम्प्रदानत्वम् इति फलितोऽर्थः।

अत्र सूत्रे यदुद्देश्यत्वं नाम, तदेव शेषित्वमित्युच्यते। एवञ्चात्र यमिति निर्दिष्टस्य शेषित्वरूपमुद्देश्यत्वम्, कर्मणेति निर्दिष्टस्य तु शेषत्वम्। अङ्गत्वमिति यावत्। तच्च परोद्देशप्रवृतपुरुषव्यापारगोचरत्वरूपम्। अत एव 'अजां ग्रामं नयति' इत्यादौ नयतिक्रियया: कर्मणा अजयाभिप्रेयमाणस्यापि ग्रामस्य न सम्प्रदानत्वम्। शेषित्वस्यैव सम्प्रदानत्वेन अजाया: ग्रामं प्रति शेषत्वं नास्तीति अजानिरूपितशेषित्वस्य ग्रामेऽभावात् न चतुर्थी। वस्तुतस्तु 'अजां ग्रामं नयती'त्यादौ परत्वात् कर्मसंज्ञया बाध इति नागेशभट्टा आहुः। यत्र तु ग्रामस्यैव संस्कारार्थं ग्रामोऽजासंयुक्तो भवत्युद्देश्येनाजानयनम्, तत्र प्रथममते सम्प्रदानत्वं भवत्येव- 'अजां ग्रामाय नयती'ति। नागेशमते तु परत्वात्कर्मसंज्ञैव। एवञ्चात्र विषये द्वयोर्मतयो: विरोध इत्याकलनीयम्। कर्मणेत्युक्ते: सकर्मकस्थले एव सम्प्रदानसंज्ञाया: वक्तुं शक्यत्वादकर्मकस्थले 'पत्ये शेते' 'श्राद्धाय निगर्हते' इत्यादौ कथं सम्प्रदानत्वमिति प्रश्ने वार्तिकमुच्यते- " क्रियया यमभिप्रैति सोऽपि सम्प्रदानमिति। तदेतदग्रे निरूपयिष्यते।

## शोधसमस्याः

"कर्मणा यमभिप्रैति स सम्प्रदानमि"ति इति सूत्रानुसारं सम्प्रदानत्वविमर्शार्थं प्रस्तुतेऽस्मिन् लेखे लेखोपस्थापनात्पूर्वं समुपस्थिता: समस्या: निम्नाङ्किता: वर्तन्ते-

क)'क्रियाग्रहणं कर्तव्यमि'ति पठितु: वार्तिककारस्य, तत्प्रत्याख्यातु: भाष्यकारस्य च क आशय: ?

ख) वैयाकरणमते चतुर्थ्यर्थ: क:?

ग) विभक्त्यर्थविषये नागोजिभट्टकृतसिद्धान्त: क:?

## शोधस्योद्देश्यम्

भगवत्पाणिन्युपज्ञमष्टाध्यायी शब्दतत्वविद्भि: शास्त्रविद्भिश्च प्रक्रियानिर्वाहाय तत्तत्पदशक्तिज्ञानाय सादरं प्रमाणत्वेन आद्रियत इत्यत्र नास्ति किञ्चिद्वक्तव्यम्। इमामेवाष्टाध्यायीमाश्रित्य वररुचिर्वार्तिकं प्रणिनाय, भगवान् पतञ्चलि: महाभाष्यं विरचयामास। भर्तृहरि: वाक्यपदीयं प्राणैषीत्, यत्सर्वैर्दार्शनिकै: प्रमाणत्वेन समुदाह्रियते। एवं स्थिते अष्टाध्याय्यन्तर्गतसम्प्रदानसूत्रे वार्तिकभाष्यसमीक्षणपूर्वकं वाक्यपदीयशेखरभूषणसार-मञ्जूषादिग्रन्थपरिशीलनेनोल्लिखित: सम्प्रदानत्वविमर्शोऽयं शब्दतत्वजिज्ञासूनामध्येतृणाञ्च महते उपकाराय

संजायते। किञ्च पूर्वोक्तशोधसमस्यानां समाधानमेव लेखस्यास्य प्रमुखमुद्देश्यं भवति। तथा च अधोनिर्दिष्टान्युद्देश्यानि लेखस्यास्य भवितुमर्हन्ति-

क)'क्रियाग्रहणं कर्तव्यमि'ति पठितु: वार्तिककारस्य, तत्प्रत्याख्यातुर्भाष्यकारस्य चाशयप्रकटनम्।

ख) वैयाकरणमतानुसारेण चतुर्थ्यर्थनिरूपणम्।

ग) विभक्त्यर्थविषये नागेशभट्टकृतसिद्धान्तावलोकनम्।

एवमेवास्मिन्लेखे सूत्रस्थपदकृत्यविचारोऽपि प्रतिपादितो वर्तते। यदवलोकनं निष्कृत्य सूत्रार्थपरिज्ञाने महतीमुपकृतीञ्जनयति।

## अध्ययनविधि:

प्रस्तुतशोधकार्ये सूत्रार्थसमीक्षणसन्दर्भे विश्लेषणविधि:, तुलनात्मकविधिश्चाश्रितो विद्यते। एवं सम्प्रदानत्वशक्तिविमर्शे तुलनात्मकविधि:, विवरणात्मकशैल्या समीक्षणात्मकाश्च विधय: समाश्रिता: वर्तन्ते।

## सामग्रीसङ्कलनप्रस्तुति:

'सम्प्रदानत्वविमर्श:' इत्याख्येऽस्मिन्विषये प्रस्तुतशोधकार्यस्य सम्पादनाय श्रीभट्टोदीक्षितकृतकौमुदीमनोरमे, कौण्डभट्टकृतवैयाकरणभूषणसार:, नागेशभट्टविरचितशेखरलघुमञ्जूष इत्यादीनां ग्रन्थानां, तद्व्याख्यानग्रन्थानाञ्च लेखसामग्रीरूपेण सङ्कलनं कृतं वर्तते। एवमेव वाक्यपदीयम्, प्रदीपोद्योतसहितमहाभाष्यम्, काशिकादिग्रन्थाश्चात्र लेखे सहायकरूपेणोपयुक्ता: वर्तन्ते।

## विषयनिरूपणम्

कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रेण सम्प्रदानसंज्ञा विधीयते। कर्मणा करणभूतेन यमभिसम्बद्धुमिच्छति, तत्कारकं सम्प्रदानसंज्ञं स्यादिति सूत्रार्थ:। एवञ्च ततद्धात्वर्थनिरूपितकर्मनिष्ठफलनिरूपकत्वेनेच्छाविषयस्यानेन सम्प्रदानसंज्ञा विधीयते। तथा च- 'राजा विप्राय गां ददाति ' इत्युदाहरणम्। दाधातूपस्थाप्यक्रियानिरूपितं कर्म गौ:, तया गवा विप्रमभिसम्बन्धुमिच्छति भूपति:। अयं विप्र: गोनिष्ठस्वत्वनिरूपको भवत्विति राज्ञ: इच्छाविषत्वेन विप्रस्य सम्प्रदानत्वम्।

सम्प्रदानमित्यन्वर्थसंज्ञा। तथा हि- सम्यक् प्रदीयते यस्मै तत्सम्प्रदानम्। तथा चान्वर्थसंज्ञाबलात् दाधात्वर्थस्यात्र कर्म विवक्षितमिति प्राचीना:। अत एव कौमुद्यामुक्तम्- 'दानस्य(दाधात्वर्थस्य) कर्मणा यमभिप्रैति, स सम्प्रदानसंज्ञ: स्यादिति। 'स्वस्वत्वनिर्वृत्तिपूर्वकपरस्वत्वोत्पत्यनुकूलो व्यापार: दाधात्वर्थ:। 'विप्राय गां ददाती'त्यत्र राज(स्व)स्वत्वनिर्वृत्तिपूर्वकविप्र(पर)स्वत्वोत्पत्यनुकलो व्यापार: दाधातुवाच्य:, तत्क्रियानिरूपितकर्मणा गवा विप्रमभिप्रैति देवथत्त इति विप्रस्य सम्प्रदानत्वम्, तत्वाच्च चतुर्थी। एवञ्च ' रजकस्य वस्त्रं ददाति' 'घ्नत: पृष्ठं ददाति'

इत्यादौ न सम्प्रदानत्वम्। तत्र हि यत्किंञ्चित्कालावच्छेदेन पराधीनीकरणार्थे ददातिः प्रयुज्यते। वस्तुतस्तु नात्रान्वर्थसंज्ञा स्वीक्रियते। एवञ्च यत्किंचित्क्रियानिरूपितकर्मणा अभिप्रेयमाणास्यानेन सम्प्रदानत्वमुच्यते। भाष्ये ' न शूद्राय मतिं दद्यात्' 'खण्डिकोपाध्यायस्तस्मै चपेटां ददाति' इति स्वस्वत्वनिर्वृत्तेरभावेऽपि चतुर्थीप्रयोगदर्शनात्। अन्वर्थसंज्ञाया अस्वीकाराच्चैव "तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु तत्" इति सप्तशतीश्लोकः सङ्गच्छते। अन्यथा अत्रापि दाधात्वर्थत्वाभावात् असुरेन्द्राय इति सम्प्रदानत्वं तत्र न स्यादेव। अनेन 'बालकाय कथां कथयति' 'शिष्याय फक्किकां व्याचष्टे' इत्येतादृशप्रयोगाणामपि साधुत्वं निगदितम्। 'रजकस्य वस्त्रं ददाती'ति तु शेषत्वविवक्षायां साधु इति बोध्यम्। कारकत्वविवक्षायान्तु इष्यत एव चतुर्थी।

नन्वेवमप्यकर्मकस्थलेषु कर्मणोऽभावात् यत्किञ्चित्क्रियानिरूपितकर्मणाभिप्रेयमाणं सम्प्रदानमित्येतन्नैव सम्भवतीति कथं सम्प्रदानसंज्ञा, इष्यते हि 'पत्ये शेते' 'श्राद्धाय निगर्हते' इत्यादौ सम्प्रदानसंज्ञानिमित्तिका चतुर्थीति चेदतस्तत्र वार्तिकाचार्यैः वचनमारब्धम्- क्रियाग्रहणमपि कर्तव्यम्, इहापि यथा स्यात्-श्राद्धाय निगर्हते, युद्धायः सन्नह्यते, पत्ये शेते इति-इति '(कात्यायनवार्तिकम्.१.४.३२)। तदेवोक्तं कौमुद्यां "क्रियया यमभिप्रैति सोपि सम्प्रदानमि"त्यनेन । इदञ्च कर्मरहितक्रियाविषये एव, अन्यथा सकर्मकाकर्मकसाधारण्येन एतत्प्रवृत्तौ सकर्मकस्थलेऽपि कर्मणः क्रियोद्देश्यत्वात्संप्रदानत्वापत्तिः। पूर्वोक्तोदाहरणानां क्रमशः: श्राद्धविषयकनिन्दामाविष्करोति, युद्धविषयकं सन्नहनपूर्वकं निश्चयं करोति, पतिमुपसृत्य शेत इत्येवमर्थः।

भाष्यकारस्तु क्रियाया अपि कृत्रिमकर्मत्वमस्त्येव, सूत्रे चास्मिन् " कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः' इति न्यायेन कृत्रिममेव कर्म गृह्यते, न तु *"कर्तरि कर्मव्यतिहारे"*(पाणिनिसूत्रम्.१.४.१४) इत्यादाविव क्रियासामान्यम्। एवञ्च 'पत्ये शेते' इत्यादौ सन्दर्शनप्रार्थनाध्यवसायजन्यारम्भक्रियानिरूपितं कर्मत्वमस्त्येवेति 'क्रियाग्रहणं कर्तव्यमिति वार्तिकं प्रत्याचख्यौ। अयं भावः -कर्तादौ सन्दर्शनक्रियामिप्सति, ईप्सनक्रियोद्देश्यत्वच्च सन्दर्शनक्रियायाः कर्मसंज्ञा। सन्दर्शनक्रियया प्रार्थयतिक्रियामीप्सति, तेन प्रार्थयतिक्रियायाः कर्मसंज्ञा। एवं प्रकारेण प्रार्थयतिक्रियया अध्यवस्यतिक्रियाम्, अध्यवस्यतिक्रियया आरम्भणक्रियाम्, आरम्भणक्रिय वहया शयनादिक्रियामीप्सतीति आरम्भणक्रियोद्देश्यतया शयनादिक्रियायाः कर्मसंज्ञा। तादृशकर्मणाभिप्रेयमाणत्वञ्च पत्यादेरिति वचनं विनापि सिद्ध्यत्येव चतुर्थी। हरिरप्येवमाह-

*संदर्शनं प्रार्थनायां व्यवसाये त्वनन्तरा।*
*व्यवसायस्तथारम्भे साधनत्वाय कल्पते ॥ इति।(वाक्यपदीयम्. ३.७.१६)*

नन्वेवम् 'घटं करोति' 'विप्राय गां ददाति' इत्यादावपि घटगवादेरपि पूर्वोक्तरीत्या क्रियोद्देश्यत्वेन सम्प्रदानत्वापत्तिः। तथा च कर्मसम्प्रदानत्वयोस्तत्र पर्यायतापत्तिरिति चेदुच्यते- एवमत्र विषयव्यवस्था। यत्र संदर्शनादिक्रियाः धात्वर्थाद्भेदेन विवक्ष्यन्ते, तत्र सम्प्रदानसंज्ञा। यथा- 'पत्ये शेते'। यत्र तु धात्वर्थाभेदेन ताः विवक्ष्यन्ते, तदा कर्मसंज्ञा। 'घटं करोती'त्यादौ यथा। क्व भेदविवक्षा, क्वाभेदविवक्षेति तु प्रयोगानुसारेणैवेति न

प्रयोगसाङ्कर्यापत्तिः। क्वचित् भेदाभेदविवक्षापि। तेन कर्मसंप्रदानत्वयोः पर्यायेण प्रवृत्तिः। तेन 'ग्रामं ग्रामाय वा गच्छती'ति सिद्धम्। "गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि"(पाणिनिसूत्रम्.२.३.१२) इति सूत्रन्तु नारम्भणीयमेवेति तद्भावः। 'मनसा हरिं व्रजति' 'पन्थानं गच्छती'त्यादयोऽपि लक्ष्यानुसारैणैवेति दिक्। तदुक्तं हरिणा-

*भेदस्य च विवक्षायां पूर्वां पूर्वां क्रियां प्रति।*
*परस्याङ्गस्य कर्मत्वान्न क्रियाग्रहणं कृतम्॥ (वाक्य,साधनसमुद्देशः,१३१)*

अथवा 'विप्राय गां ददाती'त्यादौ विप्रपदे, 'पत्ये शेते' इत्यादौ च सावकाशायाः सम्प्रदानसंज्ञायाः 'कटं करोति' इत्यादौ निरवकाशया सम्प्रदानसंज्ञया बाधः। न च पर्यायतायां न निरवकाशत्वमिति वाच्यम्, तक्रकौण्डिन्यन्यायेन सत्यपि सम्भवे बाधस्य दर्शनात्। किञ्च "गत्यर्थाकर्मणि-" इति सूत्रमेव गत्यर्थेतरविषये पर्यायस्यानिष्टत्वे मानमिति पर्यायस्य वक्तुमशक्यत्वमपि। अतः न 'कटं करोति' इत्यादौ सम्प्रदानत्वापत्तिर्दोष इति बोध्यम्।

## सम्प्रदानसूत्रे पदकृत्यविचारः-

क्रियानिरूपितकर्मणा करणभूतेन कर्ता यमभिप्रैति, तस्य सम्प्रदानसंज्ञानेन "कर्मणा यमभिप्रैति-" इत्यनेन विधीयते। 'विप्राय गां ददाति' इत्यादौ कर्मणा गवा करणभूतेन राजा विप्रमभिप्रैतीति तस्य सम्प्रदानसंज्ञा भवति। न चात्र एकस्यैव गोः कथं कर्मत्वं करणत्वमपीति शङ्क्यम्। क्रियाभेदेनादोषात्। दानक्रियायां गौ कर्म, अभिप्रयणक्रियायान्तु करणमिति। (सुब्रह्मण्य, सन्१९४१)

### कर्मणेति किम्?

ननु सूत्रे कर्मणेति पदाभावेऽपि 'विप्राय गां ददाती'त्यादौ गवादिना विप्रादीनामभिप्रेयमाणत्वेन सम्प्रदानत्वं सिद्ध्यति,। न च दानक्रियया गवादेरप्यभिप्रेयमाणत्वमस्तीति तस्यापि सम्प्रदानत्वं प्राप्नोतीति दोष इति वाच्यम्, गवादेः प्रकृतधातूपात्तदानक्रियाप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेन कर्मसंज्ञा परत्वात्भवत्येवेति परिशेष्याद्विप्रादेरेव सम्प्रदानत्वं भविष्यति। अकर्मकस्थले तु कर्मग्रहणेऽपि सन्दर्शनादिक्रियारूपकर्म स्वीकृत्य इष्यत एव पत्यादीनां कर्मसंज्ञेति चेदुच्यते- कर्मणेति पदाभावे कर्मणोऽप्युद्देश्यतया ऽन्तरङ्गत्वात्तस्यैव सम्प्रदानसंज्ञा स्यात्, विप्रादेर्न स्यादित्यव्याप्त्यतिप्याप्ती स्याताम्। अयमाशयः- सूत्रे कर्मणेत्यस्याभावे अभिप्रैतीति कर्तृतिङन्तश्रवणेन कर्तुराकाङ्क्षायां केनाभिप्रैतीति जिज्ञासा समुदेति, तत्र प्रत्यासत्या स्वनिष्ठक्रिययेति शेषपूरणं भविष्यति। तथा च दानक्रियाभिप्रेतगवा विप्रोऽभिप्रेत इति तस्य क्रियासम्बन्धः बहिरङ्गः। गोऽस्तु साक्षादिति सोऽन्तरङ्गः। तथा चान्तरङ्गत्वात्गवादेरेव सम्प्रदानत्वापत्तिः। न चैवं कर्मसंज्ञाया निरवकाशत्वमिति सैव प्रवर्तत इति वाच्यम्, पर्यायेणोभयोरपि प्रवृत्तिप्रसङ्गः। अन्तरङ्गत्वात्साक्षात्क्रियासम्बन्धे एव सम्प्रदानत्वमिति निर्णये हि तस्यापि निरवकाशत्वं तुल्यमेव। एवञ्च वचनद्वयसामर्थ्यात्पर्यायापत्तिर्दोषः, अतः कर्मणेति वक्तव्यम्।

**यं सेति ग्रहणं किम्?**

अध्याहारेणापि सर्वनामद्वयार्थस्य लाभात्सूत्रे तद्ग्रहणाभावेऽपि न दोष इति प्रश्नाशय: । कर्मणा यमभिप्रैतीति सूत्रे यं स इति यच्छब्दतच्छब्दयोरनुपादाने कर्मणा य अभिप्रैति स सम्प्रदानसंज्ञ इत्येवार्थ: स्यात् । तथा च 'विप्राय गां ददाति राजा' इत्यादौ गौ: विप्रसम्बन्धी भवत्विति इच्छाकर्तु राजादेरेव सम्प्रदानत्वापत्तिः । तथाहि- अभिप्रैतीति कर्तृतिङ्श्रुत्या "यः सः" इत्येव लभ्यते। तिङ्पदश्रुत्योपस्थापितकर्तृपदार्थसम्बन्धेनैव निराकाङ्क्षत्वेऽनुपस्थितपदार्थाध्याहारे मानाभावात्। तथा च तदर्थसम्बन्धेनैव निराकाङ्क्षतया "यं सः" इत्यध्याहारो नोपपद्यते। तथा च कर्मणा योऽभिप्रैति स संप्रदानमिति सूत्रार्थलाभात्कर्तुरेव संप्रदानत्वापत्तिः । कर्तृसंज्ञा त्वकर्मकधातुस्थले सावकाशा स्यात्। ततश्च विप्राय राज्ञा गौर्दीयत इत्यर्थे राज्ञे विप्रस्य गौर्दीयत इति प्रयोगापत्तिः । नन्वेवं सूत्रवैयर्थ्यापत्ति:, तथा हि राज्ञ कर्तृसंज्ञायां सत्यां तादृशकर्तृव्यापारप्रयोज्यफलाश्रयत्वेनेच्छाविषयत्वात्गो: कर्मसंज्ञा सिद्ध्यति, परन्त्विदानीं यंसग्रहणाभावे कर्तुरेव कर्तृत्वाभावे *"कर्तुरीप्सिततमं कर्म"*(पाणिनिसूत्रम्.१.४.४९) इति कथं कर्मत्वमिति चेदुच्यते- कर्मसंज्ञाविधायकसूत्रे कर्तृग्रहणं स्वतन्त्रोपलक्षणार्थम्, तथा च राजादे: कर्तृसंज्ञाभावेऽपि प्रधानीभूतधात्वर्थव्यापाराश्रयत्वरूपं स्वातन्त्र्यमस्त्येवेति तन्निष्ठव्यापारप्रयोज्यफलाश्रयत्वेन सिद्ध्यत्येव कर्मसंज्ञेति भाव: । अत एव 'सार्थाद्धीयते' इत्यादौ कर्तुरपादानत्वेऽपि कर्मणि लकार उत्पद्यते । अतोऽभिप्रयणकर्तुस्सम्प्रदानत्ववारणाय यंसग्रहणमिति स्थितम् ।

**अभिप्रैतीति किम्?**

ननु सूत्रे यमभिप्रैतीत्यत्र अभिप्रेत्युपसर्गद्वयमनर्थकम्, तद्धि कर्मणा यं संवध्नातीत्यर्थसम्पादनायेति वाच्यम्, परन्तु तदभावेऽपि कर्मणा यमेति = गच्छति प्राप्नोति सम्बध्नातीत्यूवं तदर्थो लभ्यत इति तदानर्थक्यस्य सत्वादिति प्रश्न:? तत्रोच्यते समाधानम्- अभिप्रग्रहणाभावे पूर्वोक्तरीत्यार्थ: स्यादिति सन्निहितसम्प्रथानपदार्थस्थले विप्रतुष्टिरूपदृष्टफलवत्वेन तत्रैवेयं सम्प्रदानसंज्ञा स्यात्, विप्रकृष्टस्थले तु विप्राय ददातीति नैव सयात्, अत: अभिप्रेति उपसर्गद्वयग्रहणम्। अभिरत्राभिमुख्ये वर्तते। प्रशब्दश्चादिकर्मणि। तथा च कर्ता कर्मणा करणभूतेन क्रियारम्भे यमुद्दिशति, स सम्प्रदानमिति सूत्रार्थो लभ्यते। स चोद्देशः सन्निहितेऽसन्निहिते च सर्वत्रास्तीति भाव: । एवञ्च विप्रकृष्टसम्प्रदानस्थले दृष्टफलाभावेऽपि सम्प्रदानत्वार्थं अभिप्रेत्युपसर्गद्वयग्रहणमिति बोद्ध्यम् ।

## चतुर्थ्यर्थविचारः

*आश्रयोऽवधिरुद्देश्य: सम्बन्ध: शक्तिरेव वा ।*
*यथायथं विभक्त्यर्था: सुपां कर्मेति भाष्यत: ॥ (शास्त्री,सन्२०१६,पृ.२९९)*

इति वैयाकरणमतोन्मज्जनकारिकोक्तप्रकारेण उद्देश्यत्वं चतुर्थ्यर्थ:। उद्देश्यत्वञ्च तत्तद्धात्वर्थनिरूपितकर्मनिष्ठफलाश्रयत्वेनेच्छाविषयत्वम्। तथाहि "सम्प्रदाने चतुर्थी" इत्यनेन सम्प्रदानार्थे चतुर्थी विधीयते। तच्च सम्प्रदानं किमिति चेत्-"कर्मणा यमभिप्रैति स सम्प्रदानम्" इति सूत्रबलात्

यत्किञ्चित्क्रियानिरूपितकर्मणा करणभूतेन यमभिसम्बन्धुमिच्छति, स इति लभ्यते। तत्रान्यार्थस्यन्यलभ्यत्वा'दनन्यलभ्य: शब्दार्थ:' इति तस्यैव चतुर्थ्यर्थत्वम्। इदमेव च शेषित्वमित्यप्युच्यते।

तत्र उद्देश्यः चतुर्थ्यर्थ इत्यत्र मीमांसाशास्त्रप्रमाणमपि अस्ति। तथाहि उद्देश्यत्वं नाम प्राधान्यम्। तच्च चतुर्थीविभक्त्या प्रतीयते इति तस्मिन्नपि दर्शने स्वीकृतमस्ति। 'प्रासनवन्मैत्रावरुणाय दण्डप्रदानम् कृतार्थत्वादि'ति मैत्रावरुणाय दण्डदानस्य प्रतिपत्तिकर्मत्वबोधकं जैमिने: पूर्वपक्षसूत्रम्। इत्यधिकरणे क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति विहितं दण्डदानं न प्रतिपत्तिः, किं तु चतुर्थीश्रुत्या अर्थकर्मेति तत्र निर्णीतम्। तेन च प्रकरणेन चतुर्थीविभक्तेः उद्देश्यत्वं तैरपि स्वीकृतमस्तीति ज्ञायते। अग्निष्टोमप्रकरणे च कृष्णविषाणया कण्डूयते इति विधायैवमुक्तम्- "नीतासु दक्षिणासु कृष्णविषाणां चात्वाले प्राप्स्यती'ति। प्रास्यतीति प्रपूर्वकादसु क्षेपणे धातोर्दैवादिकस्य रूपम्। अयञ्चार्थ:- यदा यजमानेन प्रदत्ता दक्षिणा ऋत्विग्भि: स्वीकृता, तदा यजमान: गात्रकण्डूयनाय स्वहस्ते गृहीतं कृष्णमृगश्रृङ्गं चत्वालाख्ये यज्ञसम्बन्धिगर्ते प्रक्षिपेदिति। तत्र प्रासनस्य प्रतिपत्तिकर्मत्वबोधकं सूत्रमुक्तम्- *" उत्पत्तौ येन संयुक्तं तदर्थं श्रुतिहेतुत्वात्तस्यार्थान्तरगमनशेषत्वात्प्रतिपत्ति: स्तात्" (जैमिनीयसूत्रम्. ४.२.१९)* इति। एवञ्च सोमक्रयणानन्तरं मैत्रावरुणाय प्रोक्तं दण्डदानं प्रतिपत्तिकर्म, अर्थकर्म वेति संदेहे चात्वाले कृष्णविषाणां प्रास्यतीत्यत्र प्रासनवद्दण्डदानं प्रतिपत्तिकर्म, दण्डेन दीक्षयतीति दीक्षायां दण्डस्य विनियुक्तत्वादिति पूर्वपक्षसूत्राशय:। तदनु सिद्धान्तसूत्रम्- *"अर्थकर्म वा कर्तृसंयोगात्स्रग्वत्"(जैमिनीयसूत्रम्. ४.२.१८)* इति। अयमाशय:- पूर्वोक्तरीत्या प्रासनवद्दण्डप्रदानं न प्रतिपत्तिकर्म भवति। मैत्रावरुणायेति संप्रदाने चतुर्थीश्रवणात्, सम्प्रदानस्य च क्रियोद्देश्यत्वादर्थकर्मैव। प्रधानकर्मणि यज्ञादौ कृतोपयोगस्य वस्तुन: संस्कारकं कर्मैव प्रतिपत्तिकर्मेत्युच्यते। यथा- इडाभक्षणादि। उपयोक्ष्यमाणस्य संस्कारश्चार्थकर्म। यथा- व्रीह्यादेरुपयोक्ष्यमाणस्योपयोगात्पूर्वमेव प्रोक्षणादिसंस्कार:। एवञ्चोद्देश्यत्वस्य च प्राधान्यसमनियतत्वात् मैत्रावरुणस्य उद्देश्यत्वलक्षणप्राधान्यावगमात् दण्डदानमर्थकर्म प्रधानकर्मैव, न तु प्रतिपत्तिकर्मेति सिद्धान्तितं मीमांसादर्शने।(द्विवेदी,सन्१९८५,पृ.२७५) एवञ्चास्मात् मिमांशाग्रन्थादपि शेषित्वमर्थादुद्देश्यत्वमेव चतुर्थ्यर्थ इति स्पष्टम्।

भर्तृहरिणा साधनसमुद्देशे सम्प्रदानविभागो दर्शित:। तथा हि-

*अनिराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम्।*
*प्रेरणानुमतिभ्याञ्च लभते संप्रदानताम्।(वाक्यपदीयम्.३.७.१२९)*

कर्तुस्त्यागाङ्गं कर्मणा ईप्सितमनिराकरणात्, प्रेरणानुमतिभ्याञ्च सम्प्रदानतां लभत इत्यन्वयार्थ:। अत्र देवतानिराकर्तृसम्प्रदानम्। याचक: प्रेरयितृसम्प्रदानम्। उपाध्यायस्त्वनुमन्तृसम्प्रदानम्। एवञ्च उद्देश्यत्वमेव सम्प्रदानचतुर्थ्यर्थ:।

## विभक्त्यर्थविषये सङ्क्षेपेण नागेभट्टमतनिरूपणम्

नागेशभट्टमते "कर्तुरीप्सिततमं कर्म" इत्यादीनां कर्तु: क्रियया आप्तुमिष्टतमौ कर्मत्वशक्तिमत्, क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणत्वशक्तिमदित्येवमर्थ:। एवञ्चानेन प्रकारेण यत्किञ्चित्क्रियानिरूपितकर्मणा यमभिसम्बन्धुमिच्छति तत्सम्प्रदानत्वशक्तिमद्भवतीत्यर्थ:। एवञ्च सम्प्रदानत्वशक्तिमान्, तद्गतं विशेषणं क्रियाकारकभावसम्बन्धोऽपि चतुर्थ्यर्थ:। तत्र सम्प्रदानत्वशक्तिविशिष्टस्य चतुर्थ्यर्थत्वे "कर्मणा यमभिप्रैति स सम्प्रदानम्" इति सूत्रमेव प्रमाणम्। एवं प्रकारेण कर्मत्वादिशक्तिविशिष्टस्य द्वितीयाद्यर्थत्वे "कर्मणि द्वितीया" इत्यादिसूत्राण्येव प्रमाणानि। न हि इतरसम्बन्धानवच्छिन्नविशेषणविशेष्यभावसम्बन्धमन्तरान्य: आकाङ्क्षालभ्य:, अपि तु सर्वोऽपि पदजन्यबोधविषयतयैव भासते। अत एव क्रियाकारकभावसम्बन्ध द्वितीयाद्यर्थ इत्येव वक्तव्यम्। एवञ्च शक्तिमत्कारकमिति कारकविभक्तिनां तत्तच्छक्ति:, क्रियाकारकभावसम्बन्धोऽप्यर्थ:। शक्ति: कारकमिति पक्षे तु तत्तच्छक्ति: क्रियाकारकभावसम्बन्धश्चार्थ इति बोद्ध्यम्। भेदसमानाधिकरणविशेषणत्वज्ञान एव हि विशेषणविशेष्यसंबन्धाकाङ्गेति तदपि द्वितीयाद्यर्थ:। "तद्धितश्चासर्वविभक्ति:"(पाणिनिसूत्रम्.१.१.३८) इति सूत्रस्थं भाष्यम्, "कारके"( पाणिनिसूत्रम्.१४.२३) इति सूत्रस्थं भाष्यं "समर्थ: पदविधि:" (पाणिनिसूत्रम्२.२.१) इति सूत्रस्थं भाष्यमप्यत्र प्रमाणम्। तथा हि- कष्टं श्रितो भवतीत्यत्र क्रियाकारकयोः अभिसंबन्धस्य द्वितीयावाचिका भवतीति समर्थः पदविधिरिति सूत्रभाष्यात् संबन्धः विभक्तिवाच्य इति स्पष्टं भवति। तथा हि समर्थसूत्रस्थं भाष्यम्-

*इह राज्ञः पुरुष इत्युक्ते राजा पुरुषमपेक्षते ममायमिति, पुरुषोऽपि राजानमपेक्षते अहमस्येति। तयोरभिसंबन्धस्य षष्ठी वाचिका भवति। तथा कष्टं श्रित इति क्रियाकारकयोरभिसंबन्धस्य द्वितीया वाचिका भवति। (श्रीभार्गव, सन् २०२३, पृ३३२)*

राज्ञः पुरुष इत्यत्र राजा विशेषणं पुरुषो विशेष्यः तयोः अभिसंबन्धस्य षष्ठी वाचिका। तद्यथा कष्टं श्रित इति क्रियाकारकयोरित्यादिभाष्यसन्दर्भेण षष्ठीवदस्याः अपि संबन्धवाचकत्वस्य प्रतीते: क्रियाकारकभावसम्बन्धोऽपि कारकविभक्त्यर्थ:। न च कैयटोक्तरीत्या लक्षणया भाष्यसमन्वय इति वाच्यम्, क्रियात्वकारकत्वसमूहः संबन्ध इति तद्भाष्यार्थात्, लक्षणायां प्रमाणाभावात्, गौरवाच्च। तत्सूत्रस्थोद्योत चैवं कैयटव्याख्यानिराकरणपूर्वकं भाष्याशय: स्पष्टीकृत:। उक्तं भाष्यमेव विशेषणत्वस्यापि विभक्तिवाच्यत्वे मानम्। भेदसमानाधिकरणविशेषणत्वज्ञाने एव संबन्धाकाङ्क्षेति विशेषणत्वमपि द्वितीयावाच्यम्। विशेषणत्वं च शक्तिमत्वे एवेति शक्तिरपि द्वितीयावाच्या। एवं च समर्थसूत्रस्थभाष्यात् क्रियाकारकभावरूपसंबन्धस्य तदुपपत्तये विशेषणत्वस्य तदुपपतये शक्तेश्च विभक्तिवाच्यत्वमङ्गीकर्तव्यमेवेति बोध्यम्। किञ्च तत्रैव सूत्रे भाष्ये 'राजा विशेषणं पुरुषो विशेष्य:' इत्युक्ते: विभक्तिवाच्यस्यापि क्रियाकारकभावसम्बन्धस्य संसर्गतयैव भानम्। अन्यथा हि राजा सम्बन्धे विशेषणम्, स च पुरुष इति वदेत्। न च पदोपस्थितसम्बन्धस्य प्रकारताविशेष्यतैव भानम्, न तु संसर्गतयेति वाच्यम्, तथा नियमस्वीकारे प्रमाणाभावादिति बोद्ध्यम्। एवमेव पूर्वोक्तसूत्रद्वयस्थं भाष्यमप्यस्मिन्नर्थे प्रमाणमिति मञ्जूषादौ स्पष्टमिति तत एवाध्वसेयम्।

## निष्कर्षः

'राजा विप्राय गां ददाती'त्यादौ दाधातूपस्थाप्यक्रियानिरूपितकर्मणाभिप्रेयमाणत्वात् भवति गो: सम्प्रदानत्वम्। पत्ये शेत इत्यादौ तु धातोरकर्मकत्वात्कर्मणाभिप्रेयमाणत्वस्य वक्तुमशक्यत्वात् क्रियया यमभिप्रैति स सम्प्रदानमिति वार्तिकेन सम्प्रदानत्वसिद्धिः। वार्तिकप्रत्याख्यानपक्षे तु शयनादिक्रियाया अपि सन्दर्शनप्रार्थनव्यवसायजन्यारम्भणक्रियानिरुपितं कर्मत्वमस्त्येवेति तदभिप्रेयमाणत्वात्पत्युस्तत्वम्। । पतिसम्प्रदानकम् आरम्भणकर्मभूतं पत्नीकर्तृकं शयनमिति बोधः। क्रियया यमभिप्रैति स सम्प्रदानमिति वार्तिकमते तु पतिसम्प्रदानकं शयनमिति बोधः। तत्तत्संज्ञासूत्रैः तत्तदर्थे तत्तत्कारकशक्तिमत्वबोधनात्। "समर्थ: पदविधि:" इति सूत्रस्थभाष्यात्, "कारके" इति सूत्रस्थभाष्याच्च विभक्तीनां क्रियाकारकभावसम्बन्धोऽप्यर्थ:। स च संसर्गतयैव भासते, तत्सूत्रस्थभाष्यप्रामाण्यादेवेति बोद्ध्यम्।

## कृतज्ञताज्ञापनम्

शोधस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च साधु परीक्षणं विधाय सम्पादनाय परिष्काराय च महदुपकारं कृतवद्भ्य: सर्वेभ्य: विशेषज्ञेभ्य: गुरुजनेभ्यश्च सहायकेभ्यश्चान्येभ्य: हार्दं कार्तज्ञ्यं व्यनज्मि।

## सन्दर्भग्रन्थसूची-

द्विवेदी, श्रीब्रह्मदत्त:(सन्१९८५)*श्रीकौण्डभट्टकृतवैयाकरणभूषणसार*:(दर्पणहिन्दीभाष्योपेत:)चौखम्बा ओरियन्टालिया , वाराणसी- २२१००१।

पाणिनि, *अष्टाध्यायी*. प्राविधिकमाध्यमेन {ashtadhyayi.com(app)} नीलेश बोडस।

पेरि,महामहोपाध्यायसूर्यनारायणशास्त्री(सन् २०२१) *श्रीनागेशभट्टकृतवैयाकरणसिद्धान्तलघुमञ्जूषा.* राष्ट्रियसंस्कृतविश्वविद्यालय:(केन्द्रियविश्वविद्यालय:), तिरुपति-५१७५०२।

भट्टोजिदीक्षितः. (२००१). *वैयाकरणसिद्धान्तकौमुदी* (भा. द्वितीयो भागः). (गिरिधरशर्मा चतुर्वेदः, सम्पादक) दिल्ली: मोतीलाल बनारसीदास.

भर्तृहरि: (२०३१) *वाक्यपदीयम्*, वाराणसी : सुरसरस्वततीभवनग्रन्थमाला।

महर्षिः पतञ्जलिः (सनं् २०२३), *महाभाष्यम्* (सं. श्रीभार्गव शास्त्री), चौखम्बा संस्कृत प्रतिष्ठान।

मिश्रः राममनोहरः. (२०४०). *भूषणसारपरमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा*. वाराणसी : सम्पूर्णानन्दविश्वविद्यालयः.

शास्त्री, महामहोपाध्यायपेरिसूर्यनारायण (सन्२०१६) *श्रीकौण्डभट्टकृत-वैयाकरणभूषणसार:.* श्रीवेङ्कटेश्वरवेद-विश्वविद्यालय:, तिरुपति-५१७५०२।

श्रीभट्टोजीदीक्षितः, *प्रौढमनोरमा*(अव्ययीभावान्ता) (सन् २००९) चौखम्बा संस्कृत संस्थान, वाराणसी।

सुब्रह्मण्य शास्त्री,वेङ्कटेश्वरशास्त्री (सन् १९४१) *श्रीनागेशभट्टविरचित-लघुशब्देन्दुशेखर:*, श्रीविद्यामुद्रणालय:, आन्ध्रा।